सहायक आचार्य प्रतियोगी परीक्षा -2024
(संस्कृत शिक्षा विभाग) परीक्षा तिथि - 10/09/2024

रविभाल सिंह

पुस्तिका में पृष्ठों की संख्या : 16
Number of Pages in Booklet : 16

पुस्तिका में प्रश्नों की संख्या : 150
No. of Questions in Booklet : 150

**Paper Code : 23**

**PAS-24**

इस प्रश्न-पुस्तिका को तब तक न खोलें जब तक कहा न जाए । Do not open this Question Booklet until you are asked to do so.

प्रश्न-पुस्तिका संख्या व बारकोड/
**Question Booklet No. & Barcode**

**401413**

**Sub : Sahitya-I**
**Paper-I**

**समय : 03 घण्टे + 10 मिनट अतिरिक्त***
**Time : 03 Hours + 10 Minutes Extra***

**अधिकतम अंक : 75**
**Maximum Marks : 75**

प्रश्न-पुस्तिका के पेपर की सील/पॉलिथीन बैग को खोलने पर प्रश्न-पत्र हल करने से पूर्व परीक्षार्थी यह सुनिश्चित कर लें कि :
- प्रश्न-पुस्तिका संख्या तथा ओ.एम.आर. उत्तर-पत्रक पर अंकित बारकोड संख्या समान है ।
- प्रश्न-पुस्तिका एवं ओ.एम.आर. उत्तर-पत्रक के सभी पृष्ठ व सभी प्रश्न सही मुद्रित हैं । समस्त प्रश्न, जैसा कि ऊपर वर्णित है, उपलब्ध हैं तथा कोई भी पृष्ठ कम नहीं है/ मुद्रण त्रुटि नहीं है ।

किसी भी प्रकार की विसंगति या दोषपूर्ण होने पर परीक्षार्थी वीक्षक से दूसरा प्रश्न-पत्र प्राप्त कर लें । यह सुनिश्चित करने की जिम्मेदारी अभ्यर्थी की होगी । परीक्षा प्रारम्भ होने के 5 मिनट पश्चात् ऐसे किसी दावे/आपत्ति पर कोई विचार नहीं किया जायेगा ।

**On opening the paper seal/polythene bag of the Question Booklet before attempting the question paper, the candidate should ensure that :**
- **Question Booklet Number and Barcode Number of OMR Answer Sheet are same.**
- **All pages & Questions of Question Booklet and OMR Answer Sheet are properly printed. All questions as mentioned above are available and no page is missing/misprinted.**

**If there is any discrepancy/defect, candidate must obtain another Question Booklet from Invigilator. Candidate himself shall be responsible for ensuring this. No claim/objection in this regard will be entertained after five minutes of start of examination.**

## परीक्षार्थियों के लिए निर्देश

1. **प्रत्येक प्रश्न के लिये एक विकल्प भरना अनिवार्य है ।**
2. **सभी** प्रश्नों के अंक समान हैं ।
3. प्रत्येक प्रश्न का मात्र **एक** ही उत्तर दीजिए । एक से अधिक उत्तर देने की दशा में प्रश्न के उत्तर को गलत माना जाएगा ।
4. **OMR** उत्तर-पत्रक इस प्रश्न-पुस्तिका के अन्दर रखा है । जब आपको प्रश्न-पुस्तिका खोलने को कहा जाए, तो उत्तर-पत्रक निकाल कर ध्यान से केवल **नीले बॉल पॉइंट पेन** से विवरण भरें ।
5. कृपया अपना रोल नम्बर ओ.एम.आर. उत्तर-पत्रक पर सावधानीपूर्वक सही भरें । गलत रोल नम्बर भरने पर परीक्षार्थी स्वयं उत्तरदायी होगा ।
6. **प्रत्येक गलत उत्तर के लिए प्रश्न अंक का 1/3 भाग काटा जायेगा ।** गलत उत्तर से तात्पर्य अशुद्ध उत्तर अथवा किसी भी प्रश्न के एक से अधिक उत्तर से है ।
7. **प्रत्येक प्रश्न के पाँच विकल्प दिये गये हैं, जिन्हें क्रमश: 1, 2, 3, 4, 5 अंकित किया गया है । अभ्यर्थी को सही उत्तर निर्दिष्ट करते हुए उनमें से केवल एक गोले (बबल) को उत्तर-पत्रक पर नीले बॉल पॉइंट पेन से गहरा करना है ।**
8. **यदि आप प्रश्न का उत्तर नहीं देना चाहते हैं तो उत्तर-पत्रक में पाँचवें (5) विकल्प को गहरा करें । यदि पाँच में से कोई भी गोला गहरा नहीं किया जाता है, तो ऐसे प्रश्न के लिये प्रश्न अंक का 1/3 भाग काटा जायेगा ।**

9.* **प्रश्न-पत्र हल करने के उपरांत अभ्यर्थी अनिवार्य रूप से ओ.एम.आर. उत्तर-पत्रक जाँच लें कि समस्त प्रश्नों के लिये एक विकल्प (गोला) भर दिया गया है । इसके लिये ही निर्धारित समय से 10 मिनट का अतिरिक्त समय दिया गया है ।**

10. **यदि अभ्यर्थी 10% से अधिक प्रश्नों में पाँच विकल्पों में से कोई भी विकल्प अंकित नहीं करता है, तो उसको अयोग्य माना जायेगा ।**
11. मोबाइल फोन अथवा अन्य किसी इलेक्ट्रोनिक यंत्र का परीक्षा हॉल में प्रयोग पूर्णतया वर्जित है । यदि किसी अभ्यर्थी के पास ऐसी कोई वर्जित सामग्री मिलती है तो उसके विरुद्ध आयोग द्वारा नियमानुसार कार्यवाही की जायेगी ।

**चेतावनी :** अगर कोई अभ्यर्थी नकल करते पकड़ा जाता है या उसके पास से कोई अनधिकृत सामग्री पाई जाती है, तो उस अभ्यर्थी के विरुद्ध पुलिस में प्राथमिकी दर्ज कराते हुए **राजस्थान सार्वजनिक परीक्षा (भर्ती में अनुचित साधनों की रोकथाम अध्युपाय) अधिनियम, 2022 तथा अन्य प्रभावी कानून एवं आयोग के नियमों-प्रावधानों** के तहत कार्यवाही की जाएगी । साथ ही आयोग ऐसे अभ्यर्थी को भविष्य में होने वाली आयोग की समस्त परीक्षाओं से विवर्जित कर सकता है ।

## INSTRUCTIONS FOR CANDIDATES

1. **It is mandatory to fill one option for each question.**
2. **All** questions carry equal marks.
3. Only **one** answer is to be given for each question. If more than one answers are marked, it would be treated as wrong answer.
4. The **OMR** Answer Sheet is inside this Question Booklet. When you are directed to open the Question Booklet, take out the Answer Sheet and fill in the particulars carefully with **Blue Ball Point Pen** only.
5. Please correctly fill your Roll Number in **OMR** Answer Sheet. Candidate will themself be responsible for filling wrong Roll No.
6. **1/3 part of the mark(s) of each question will be deducted for each wrong answer.** A wrong answer means an incorrect answer or more than one answers for any question.
7. **Each question has five options marked as 1, 2, 3, 4, 5. You have to darken only one circle (bubble) indicating the correct answer on the Answer Sheet using BLUE BALL POINT PEN.**
8. **If you are not attempting a question then you have to darken the circle '5'. If none of the five circles is darkened, one third (1/3) part of the marks of question shall be deducted.**

9.* **After solving question paper, candidate must ascertain that he/she has darkened one of the circles (bubbles) for each of the questions. Extra time of 10 minutes beyond scheduled time, is provided for this.**

10. **A candidate who has not darkened any of the five circles in more than 10% questions, shall be disqualified.**
11. Mobile Phone or any other electronic gadget in the examination hall is strictly prohibited. A candidate found with any of such objectionable material with him/her will be strictly dealt as per rules.

**Warning :** If a candidate is found copying or if any unauthorized material is found in his/her possession, F.I.R. would be lodged against him/her in the Police Station and he/she would liable to be prosecuted under **Rajasthan Public Examination (Measures for Prevention of Unfair Means in Recruitment) Act, 2022 & any other laws applicable and Commission's Rules-Regulations.** Commission may also debar him/her permanently from all future examinations.

**उत्तर-पत्रक में दो प्रतियाँ हैं - मूल प्रति और कार्बन प्रति। परीक्षा समाप्ति पर परीक्षा कक्ष छोड़ने से पूर्व परीक्षार्थी उत्तर-पत्रक की दोनों प्रतियाँ वीक्षक को सौंपेंगे, परीक्षार्थी स्वयं कार्बन प्रति अलग नहीं करें । वीक्षक उत्तर-पत्रक की मूल प्रति को अपने पास जमा कर, कार्बन प्रति को मूल प्रति से कट लाइन से मोड़ कर सावधानीपूर्वक अलग कर परीक्षार्थी को सौंपेंगे, जिसे परीक्षार्थी अपने साथ ले जायेंगे । परीक्षार्थी को उत्तर-पत्रक की कार्बन प्रति चयन प्रक्रिया पूर्ण होने तक सुरक्षित रखनी होगी एवं आयोग द्वारा माँगे जाने पर प्रस्तुत करनी होगी ।**

1. नलेन क: श्रवणातिथि: अकारि ?

(1) दमयन्त्या: सन्देश:

(2) हंसप्रलाप:

(3) भीमनृपात्मजाश्रित: गुण:

(4) स्वात्मानं प्रति प्रजानुराग:

(5) अनुत्तरित: प्रश्न:

2. श्रीहर्षकाव्यानुसारं कस्यायुधसन्तापित: पितामह: अद्यापि वारिजमाश्रयति ?

(1) शिवस्य (2) नलस्य

(3) स्मरस्य (4) वसन्तस्य

(5) अनुत्तरित: प्रश्न:

3. 'प्रसह्य वैरोचनिजस्य पत्तनम्' अत्र 'वैरोचनिजस्य' कोऽर्थ: ?

(1) वृत्रासुरस्य (2) प्रद्युम्न:

(3) बाणासुरस्य (4) बकासुरस्य

(5) अनुत्तरित: प्रश्न:

4. इत्थममुं विलपन्तममुञ्चद्दीनदयालुतयाऽवनिपाल: ।
पद्येऽस्मिन् किन्नाम वृत्तम् ?

(1) इन्द्रवज्रा (2) उपेन्द्रवज्रा

(3) दोधकम् (4) त्रोटकम्

(5) अनुत्तरित: प्रश्न:

5. खे अदृश्यरूपै: देवै: प्रणतै: शिरोभि: किमर्थं परमाशिष: प्रदत्त: ?

(1) बोधाय (2) स्वस्तये

(3) दीर्घायुष्याय (4) समृद्धये

(5) अनुत्तरित: प्रश्न:

6. नलस्य स्मितेन कस्य श्रिय: जिता: ?

(1) कमलस्य (2) मृगस्य

(3) सूर्यस्य (4) विधो:

(5) अनुत्तरित: प्रश्न:

40143

7. बुद्धचरितानुसारं क: योगविधौ आचार्यपदं प्राप्तवान् ?

(1) पतञ्जलि: (2) कपिल:

(3) श्रीकृष्ण: (4) जनक:

(5) अनुत्तरित: प्रश्न:

8. चिकित्सितं यच्च चकार नात्रि: पश्चात् क: जगाद ?

(1) च्यवन: (2) अङ्गिरा

(3) भृगु: (4) आत्रेय:

(5) अनुत्तरित: प्रश्न:

9. पुत्रजन्मनि राजा किं वीक्ष्य अत्यन्तं क्षुब्धो बभूव ?

(1) अनभ्रगगनाजातामकालवृष्टिम्

(2) वृक्षेषु अकालफलोद्गमम्

(3) स्वत: प्रादुर्भूतमद्भुतं कूपम्

(4) दिव्याद्भुतं जन्म

(5) अनुत्तरित: प्रश्न:

10. आर्षेण मार्गेण तु यास्यतीति ज्ञात्वा शुद्धोदनस्य, हृदये किं जातम् ?

(1) वैराग्यम् (2) चिन्ता

(3) हर्ष: (4) क्रोध:

(5) अनुत्तरित: प्रश्न:

11. महर्षि:असित: पार्थिवान्त:पुरसन्निकर्षं किं मत्वा विवेश ?

(1) देवालयसंज्ञयेव (2) वनसंज्ञयेव

(3) प्रासादसंज्ञयेव (4) उटजसंज्ञयेव

(5) अनुत्तरित: प्रश्न:

12. 'अधारयन् पाण्डुरमातपत्रं बोधाय जेपु: परमाशिषश्च ।'
अत्र पाण्डुरमातपत्रं के अधारयन् ?

(1) दिवौकस: (2) जना:

(3) दास्य: (4) वनौकस:

(5) अनुत्तरित: प्रश्न:

13. दशकुमारचरितानुसारं संसारासारतां बुद्ध्वा तीर्थयात्राभिलाषी देशान्तरं कः अगमत् ?

(1) धर्मपालः (2) सत्यवर्मा

(3) सितवर्मा (4) सुमतिवर्मा

(5) अनुत्तरितः प्रश्नः

14. योद्धुमनसा मानसारस्य मगधदेशमागमनं श्रुत्वा राजहंसेन स्वान्तः पुरवर्गः कुत्र प्रेषितः ?

(1) विन्ध्याटवीमध्ये (2) दण्डकारण्ये

(3) गिरिनारप्रदेशे (4) कान्यकुब्जे

(5) अनुत्तरितः प्रश्नः

15. उपहारवर्मा केन पालितः ?

(1) राजहंसेन (2) राजवाहनेन

(3) मानसारेण (4) सुमन्त्रेण

(5) अनुत्तरितः प्रश्नः

16. राजहंसेन कस्य वृत्तान्तं सुश्रुताय श्रावितम् ?

(1) मित्रगुप्तस्य (2) रत्नोद्भवस्य

(3) सुमन्त्रस्य (4) मानसारस्य

(5) अनुत्तरितः प्रश्नः

17. तापसः विदेहनाथस्य कुमारमन्विष्यन् कुत्र अगच्छत् ?

(1) शिवमन्दिरम् (2) कृष्णमन्दिरम्

(3) चण्डिकामन्दिरम् (4) विनायकमन्दिरम्

(5) अनुत्तरितः प्रश्नः

18. ब्रह्माण्डच्छत्रदण्डःशतधृतीत्यादि मङ्गलाचरणश्लोके दण्डिना किं छन्दः प्रयुक्तम् ?

(1) मन्दाक्रान्ता (2) शार्दूलविक्रीडितम्

(3) हरिणी (4) स्रग्धरा

(5) अनुत्तरितः प्रश्नः

19. 'जनपतिरेकस्मिन् पुण्यदिवसे तीर्थस्नानाय पक्कणनिकटमार्गेण गच्छन्'

अत्र लिखितस्य 'पक्कणः' इति शब्दस्य अर्थः अस्ति –

(1) शबरालयः (2) पाकशाला

(3) प्रस्तरप्रायो देशः (4) अश्वशाला

(5) अनुत्तरितः प्रश्नः

20. सुवृत्ता कस्य कन्या आसीत् ?

(1) कुमारगुप्तस्य (2) सुकालगुप्तस्य

(3) कालगुप्तस्य (4) मित्रगुप्तस्य

(5) अनुत्तरितः प्रश्नः

21. मणिभद्रनामयक्षस्य कन्या तारावली कस्य पत्नी आसीत् ?

(1) धर्मपालस्य (2) कामपालस्य

(3) सुमन्त्रस्य (4) वीरपालस्य

(5) अनुत्तरितः प्रश्नः

22. 'त्रयीमयाय त्रिगुणात्मने नमः' इति कादम्बरी मङ्गलाचरणे त्रिगुणशब्देन उच्यन्ते –

(1) माधुर्यमोजःप्रसादाः

(2) सत्त्वरजस्तमांसि

(3) उपमा–पदलालित्यमर्थगौरवञ्च

(4) सर्गस्थितिसंहाराः

(5) अनुत्तरितः प्रश्नः

23. "देवि! देवेन कल्पवल्लीफलमवाप्नुहि" इति प्रभातसमये का देवी सुस्वप्नमवलोकितवती ?

(1) जयलक्ष्मी (2) सुवृत्ता

(3) गौरी (4) वसुमती

(5) अनुत्तरितः प्रश्नः



[redacted]

24. शूद्रकः प्रकटितविश्वरूपाकृतेः कस्य रूपस्य अनुकरणं करोति स्म ?

(1) धर्मराजस्य (2) कुबेरस्य

(3) सूर्यस्य (4) नारायणस्य

(5) अनुत्तरितः प्रश्नः

25. गजतुरगपुरुषस्त्रीलक्षणाभिज्ञः कः आसीत् ?

(1) शूद्रकः (2) मातङ्गः

(3) वैशम्पायनः (4) शबरः

(5) अनुत्तरितः प्रश्नः

26. किमत्र चित्रम् । एते हि शुकसारिकाप्रभृतयो विहङ्गविशेषा यथाश्रुतां वाचमुच्चारयन्ती त्यधिगतमेव देवेन ।

इति कस्योक्तिः ?

(1) चाण्डालकन्यकायाः

(2) चाण्डालदारकस्य

(3) शूद्रकस्य

(4) कुमारपालितस्य

(5) अनुत्तरितः प्रश्नः

27. अप्रदीपप्रभापनेयमतिगहनं तमः किम् ?

(1) लक्ष्मीमदः (2) यौवनप्रभवम्

(3) अप्रतिमरूपत्वम् (4) गर्भेश्वरत्वम्

(5) अनुत्तरितः प्रश्नः

28. 'विहङ्गमश्चायमाश्चर्यभूतो निखिलभुवनतलरत्नमिति कृत्वा देवपादमूलमेनमादायागताहम्' इति कथयति –

(1) चाण्डालकन्या (2) चाण्डालदारकः

(3) प्रतिहारी (4) अन्तःपुरिका

(5) अनुत्तरितः प्रश्नः

29. सहवासपरिचयवशाद् विरहविनोदचिह्नानि गृहीत्वेव का उद्गता ?

(1) मदिरा (2) मोहिनी

(3) लक्ष्मीः (4) कौस्तुभमणिः

(5) अनुत्तरितः प्रश्नः

30. 'विदितवेदितव्यस्य अधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति ।' इति कः कम् कथयति ?

(1) तारापीडः शुकनासम्

(2) शुकनासः चन्द्रापीडम्

(3) शुकनासः वैशम्पायनम्

(4) वैशम्पायनः चन्द्रापीडम्

(5) अनुत्तरितः प्रश्नः

31. एवंविधयापि चानया दुराचारया कथमपि दैववशेन परिगृहीताः के. विक्लवाः भवन्ति ।

(1) विद्वांसः (2) राजानः

(3) महात्मानः (4) सदाचारिणः

(5) अनुत्तरितः प्रश्नः

32. "अद्य प्रातरेवानिष्टदर्शनं जातम्, न जाने किमनभिमतं दर्शयिष्यति" इति कः अचिन्तयत् ?

(1) काकः (2) कपोतराजः

(3) पान्थः (4) मूषकः

(5) अनुत्तरितः प्रश्नः

33. पुरुषाणामखिलमलप्रक्षालनक्षमम् अजलं स्नानमस्ति ?

(1) कान्तोपदेशः (2) सन्मित्रपरामर्शः

(3) मातुरूपदेशः (4) गुरूपदेशः

(5) अनुत्तरितः प्रश्नः

34. हितोपदेशानुसारं धर्मार्थकाममोक्षाणां संस्थितिहेतवः के ?

(1) दानानि (2) तपांसि

(3) प्राणाः (4) धनानि

(5) अनुत्तरितः प्रश्नः

35. हितोपदेशानुसारं भूतिमिच्छता पुरुषेण कति दोषाः हातव्याः ?

(1) त्रयः (2) चत्वारः

(3) पञ्च (4) षट्

(5) अनुत्तरितः प्रश्नः

36. हितोपदेशे हिरण्यकेन मित्रं कतिविधं कथितम् ?

(1) षड्विधम् (2) त्रिविधम्

(3) पञ्चविधम् (4) चतुर्विधम्

(5) अनुत्तरितः प्रश्नः

37. चित्राङ्कमृगानुसारेण मित्राणि रिपवश्च कथं जायन्ते ?

(1) व्यवहारेण (2) विश्वासेन

(3) सहयोगेन (4) स्वार्थेन

(5) अनुत्तरितः प्रश्नः

38. हितोपदेशे धर्मस्य मार्गः कतिविधः स्मृतः ?

(1) सप्तविधः (2) नवविधः

(3) पञ्चविधः (4) अष्टविधः

(5) अनुत्तरितः प्रश्नः

39. 'तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तो कथं न विश्वासभूमिः ?' इति वचः कस्य कं प्रति वर्तते ?

(1) मार्जारस्य गृध्रं प्रति

(2) गृध्रस्य मार्जारं प्रति

(3) वृद्धव्याघ्रस्य पान्थं प्रति

(4) मूषिकस्य कपोतराजं प्रति

(5) अनुत्तरितः प्रश्नः

40. "भद्र! शास्त्रविरुद्धमेतत् यत्स्त्रिया सह मन्त्रः ।" इति कस्य कथनमस्ति ?

(1) ग्रक्षस्य (2) नापितस्य

(3) कौलिकस्य (4) चक्रधरस्य

(5) अनुत्तरितः प्रश्नः

41. 'यतश्चौरकर्मप्रवृत्तावावाम्, निभृतैश्च चौरजारैरत्र स्थातव्यम् ।' इति कथयति –

(1) शृगालः (2) रासभः

(3) चौरः (4) जारः

(5) अनुत्तरितः प्रश्नः

42. अपरीक्षितकारकानुसारं कैका तरुणायते ?

(1) ईर्ष्या (2) भार्या

(3) दरिद्रता (4) तृष्णा

(5) अनुत्तरितः प्रश्नः

43. पञ्चतन्त्रे शीलं शौचं क्षान्तिर्दाक्षिण्यं मधुरता कुले जन्म इति सर्वे कस्य पुरुषस्य न राजन्ते ?

(1) अनुद्योगिनः (2) विद्याविहीनस्य

(3) भाग्यहीनस्य (4) वित्तविहीनस्य

(5) अनुत्तरितः प्रश्नः

44. पञ्चतन्त्रे चत्वारो ब्राह्मणाः विद्योपार्जनार्थं कुत्र गताः ?

(1) कान्यकुब्जे (2) काश्याम्

(3) कलिङ्गे (4) कश्मीरे

(5) अनुत्तरितः प्रश्नः

45. 'पुत्रगात्रस्य संस्पर्शश्चन्दनादतिरिच्यते ।' उपर्युक्तं वचः स्मरति –

(1) मणिभद्रः (2) देवशर्मा

(3) देवशर्मभार्या (4) विष्णुशर्मभार्या

(5) अनुत्तरितः प्रश्नः

46. 'हत: शत्रु:, कृतं मित्रं, रत्नमाला न हारिता ।
नालेनास्वादितं तोयं, भवता ..........।।'
अत्र श्लोकान्ते पदद्वयम् अस्ति –
(1) साधुना स्वयम् (2) साधु वानर!
(3) साधुना पुन: (4) साधु भाषितम्
(5) अनुत्तरित: प्रश्न:

47. 'भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्रार्थ्यते ।'
अत्र 'सुमानुषस्य' विवक्षितार्थ: क: ?
(1) दाम्पत्यस्य (2) संन्यासिन:
(3) वानप्रस्थस्य (4) मनुष्यस्य
(5) अनुत्तरित: प्रश्न:

48. 'दिष्ट्या सोऽयं महाबाहुरञ्जनानन्दवर्धन:'
पद्यांशेऽस्मिन् कस्य वर्णनं क्रियते :
(1) रामस्य (2) विश्वामित्रस्य
(3) ऋष्यशृङ्गस्य (4) हनुमत:
(5) अनुत्तरित: प्रश्न:

49. उत्तररामचरिते 'पञ्चवटीप्रवेश' इति नामधेयोऽङ्कोऽस्ति –
(1) प्रथमोऽङ्क: (2) द्वितीयोऽङ्क:
(3) तृतीयोऽङ्क: (4) चतुर्थोऽङ्क:
(5) अनुत्तरित: प्रश्न:

50. राजा दशरथ: कां कन्यां व्यजीजनत् ?
(1) श्यामाम् (2) राधाम्
(3) शान्ताम् (4) कमलाम्
(5) अनुत्तरित: प्रश्न:

51. पञ्चतन्त्रे एकबुद्धिर्नामक: क: आसीत् ?
(1) मत्स्य: (2) सर्प:
(3) कर्कट: (4) मण्डूक:
(5) अनुत्तरित: प्रश्न:

52. कस्य आराधनाय स्नेहं, दयां, सौख्यं जानकीमपि च मुञ्चत: रामस्य व्यथा नास्ति ?
(1) जनकस्य (2) शिवस्य
(3) वसिष्ठस्य (4) लोकस्य
(5) अनुत्तरित: प्रश्न:

53. लौकिकानां हि साधूनामर्थं वागनुवर्तते ।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ।।
कस्य महापुरुषस्योक्तिरियम् ?
(1) अष्टावक्रस्य (2) रामस्य
(3) जनकस्य (4) दशरथस्य
(5) अनुत्तरित: प्रश्न:

54. "आर्तत्राणाय व: शस्त्रं न प्रहर्तुमनागसि" इति क: वदति ?
(1) अनसूया (2) प्रियम्वदा
(3) वैखानस: (4) सूत:
(5) अनुत्तरित: प्रश्न:

55. सन्देहपदेषु वस्तुषु अन्त:करणप्रवृत्तय: केषाम् प्रमाणम् ?
(1) असताम् (2) सताम्
(3) धीराणाम् (4) मनुष्याणाम्
(5) अनुत्तरित: प्रश्न:

56. 'एको रस: करुण एवं निमित्तभेदात् .......'
श्लोकोऽयम् उत्तररामचरितस्य कस्मिन्नङ्के वर्तते ?
(1) प्रथमे अङ्के (2) द्वितीये अङ्के
(3) तृतीये अङ्के (4) चतुर्थे अङ्के
(5) अनुत्तरित: प्रश्न:

**57.** कुलपतिः शकुन्तलायाः प्रतिकूलं शमयितुम् एतत्तीर्थं गतः

(1) रामतीर्थम् (2) दैवतीर्थम्

(3) सीतातीर्थम् (4) सोमतीर्थम्

(5) अनुत्तरितः प्रश्नः

**58.** अपसृतपाण्डुपत्राः अश्रूणीव काः मुञ्चन्ति ?

(1) मयूर्यः (2) शाखाः

(3) मृग्यः (4) लताः

(5) अनुत्तरितः प्रश्नः

**59.** 'न प्रभातरलं ज्योतिरुदेति वसुधातलात्' अत्र ज्योतिरिति शब्देन सङ्केतिता वर्तते

(1) माधवी (2) अनसूया

(3) शकुन्तला (4) गौतमी

(5) अनुत्तरितः प्रश्नः

**60.** "कस्मिन्नपि पूजार्हेऽपराद्धा शून्यहृदया शकुन्तला ।" वचनमिदं का उक्तवती ?

(1) अनसूया (2) प्रियंवदा

(3) नटी (4) गौतमी

(5) अनुत्तरितः प्रश्नः

**61.** अभिज्ञानशाकुन्तलस्य पात्राणां तेषां परिचयैः सह सुमेलनं कुरुत –

| पात्रम् | परिचयः |
|---|---|
| (क) वैखानसः | (i) राज्ञः सेनापतिः |
| (ख) भद्रसेनः | (ii) स्तुतिपाठकः |
| (ग) करभकः | (iii) कण्वस्य शिष्यः |
| (घ) वैतालिकः | (iv) राज्ञः सेवकः |

| | (क) | (ख) | (ग) | (घ) |
|---|---|---|---|---|
| (1) | (iii) | (i) | (ii) | (iv) |
| (2) | (iii) | (i) | (iv) | (ii) |
| (3) | (iii) | (ii) | (iv) | (i) |
| (4) | (iv) | (i) | (iii) | (ii) |

(5) अनुत्तरितः प्रश्नः

**62.** वासवदत्तायाः धात्री किंनामधेया ?

(1) गौतमी (2) रदनिका

(3) मदनिका (4) वसुन्धरा

(5) अनुत्तरितः प्रश्नः

**63.** 'स्वप्नवासवदत्तम्' नाटके 'महासेन' नाम्ना कः सङ्केतितोऽस्ति ?

(1) पुष्पकभद्रः (2) दर्शकः

(3) उदयनः (4) प्रद्योतः

(5) अनुत्तरितः प्रश्नः

**64.** स्वप्नवासवदत्तस्य पञ्चमोऽङ्कः प्रारभ्मते –

(1) वासवदत्ता – चेटी संवादेन

(2) विदूषक – चेटी संवादेन

(3) पद्मिनिका – मधुकरिका संवादेन

(4) काञ्चुकीय – प्रतिहारी संवादेन

(5) अनुत्तरितः प्रश्नः

**65.** स्वप्नवासवदत्तस्य पात्रविषये उपयुक्तं विकल्पं चिनुत ।

(1) पद्मावती मगधनरेश–दर्शकस्य पुत्री अस्ति ।

(2) वासवदत्ता महासेनप्रद्योतस्य भगिनी अस्ति ।

(3) मधुकरिका पद्मावत्याः सेविका अस्ति ।

(4) विजया उदयनस्य माता अस्ति ।

(5) अनुत्तरितः प्रश्नः

**66.** अधोलिखितेषु 'धीरललितः' नायकोऽस्तिः

(1) दुष्यन्तः (2) चारुदत्तः

(3) उदयनः (4) चाणक्यः

(5) अनुत्तरितः प्रश्नः

**67.** "पार्थिवोऽसौ किं वक्ष्यतीति हृदयं परिशंकितं मे" इति केन कथितम् ?

(1) रुमण्वता (2) उदयनेन

(3) सूत्रधारेण (4) यौगन्धरायणेन

(5) अनुत्तरितः प्रश्नः

68. 'अद्यापि बध्यमानां वध्य: को नेच्छति शिखां मे ।' इति कस्य कथनमस्ति: ?

(1) चाणक्यस्य (2) सूत्रधारस्य
(3) चन्द्रगुप्तस्य (4) शिष्यस्य
(5) अनुत्तरित: प्रश्न:

69. मुद्राराक्षसस्य नान्दीपाठे किं छन्द: ?

(1) शार्दूलविक्रीडितम्
(2) स्रग्धरा
(3) मालिनी
(4) शिखरिणी
(5) अनुत्तरित: प्रश्न:

70. शाले: स्तम्बकारिता कस्य गुणं नापेक्षते ?

(1) वाहीकस्य (2) बालिशस्य
(3) वप्तु: (4) वक्तु:
(5) अनुत्तरित: प्रश्न:

71. कीदृशा: समुदिता: गुणा: भृत्यानां नृपते: भूतये भवन्ति ?

(1) शक्ति–मति–रीति–स्वरूपा:
(2) प्रज्ञाविक्रमभक्तय:
(3) धर्मार्थकाममोक्षा:
(4) धन–धान्य–सुख–युक्ता:
(5) अनुत्तरित: प्रश्न:

72. "अत्यादर: शङ्कनीय:" इति वाक्यं क: कथयति ?

(1) चाणक्य: (2) चन्दनदास:
(3) शिष्य: (4) निपुणक:
(5) अनुत्तरित: प्रश्न:

73. स्वप्नवासवदत्तानुसारं स्मृत्वा स्मृत्वा किं नवत्वं याति ?

(1) शरीरम् (2) मन:
(3) सुखम् (4) दु:खम्
(5) अनुत्तरित: प्रश्न:

74. "चीयते बालिशस्यापि सत्क्षेत्रपतिता कृषि:" अत्र 'बालिश:' पदस्य अर्थ: अस्ति –

(1) बालक: (2) मूर्ख:
(3) मेधावी (4) विद्वान्
(5) अनुत्तरित: प्रश्न:

75. शूद्रकमते दिश: शून्या: कस्य ?

(1) अपुत्रस्य (2) अमित्रस्य
(3) मूर्खस्य (4) दरिद्रस्य
(5) अनुत्तरित: प्रश्न:

76. मृच्छकटिकस्य द्वितीयाङ्कस्य नाम किम् ?

(1) अलङ्कारन्यास: (2) दुर्दिन:
(3) सन्धिच्छेद: (4) द्यूतकरसंवाहक:
(5) अनुत्तरित: प्रश्न:

77. "लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभ:" अत्र कोऽलङ्कार: ?

(1) रूपकम् (2) सन्देह:
(3) भ्रान्तिमान् (4) उत्प्रेक्षा
(5) अनुत्तरित: प्रश्न:

78. "एष ते प्रणयो विप्र ! शिरसा धार्यते मया ।
गुणशस्त्रैर्वयं येन शस्त्रवन्तोऽपि निर्जिता: ।।"
श्लोकोऽयं केनोक्त: ?

(1) शकारेण (2) विटेन
(3) चारुदत्तेन (4) संवाहकेन
(5) अनुत्तरित: प्रश्न:

79. "कमलानां मनोहराणामपि रूपाद्विसंवदति शीलम् ।
सम्पूर्णमण्डलेऽपि यानि चन्द्रे विरुद्धानि ।।"
मुद्राराक्षसस्य श्लोकेऽस्मिन् कोऽलङ्कार: ?

(1) अतिशयोक्ति: (2) विषम:
(3) विभावना (4) श्लेष:
(5) अनुत्तरित: प्रश्न:

4014413

80. मृच्छकटिके पात्ररूपेण न विद्यते –
(1) मैत्रेय: (2) माढव्य:
(3) शकार: (4) शर्विलक:
(5) अनुत्तरित: प्रश्न:

81. 'मृच्छकटिकम्' प्रकरणे कस्य समाधिमाश्रित्य नान्दीपाठ: कृत: वर्तते ?
(1) विष्णो: (2) शम्भो:
(3) ब्रह्मण: (4) राज्ञ:
(5) अनुत्तरित: प्रश्न:

82. नलचम्पूकाव्यस्य द्वितीयोच्छ्वासे अस्य वर्णनं नास्ति
(1) आर्यावर्तस्य वर्णनम्
(2) शरदृतो: वर्णनम्
(3) हंसद्वारा नलस्य स्तुति:
(4) वनपालिकया वनसुषमाया: वर्णनम्
(5) अनुत्तरित: प्रश्न:

83. नलचम्पूकाव्यानुसारं वृक्षशाखा: विपल्लवा: कदा भवन्ति ?
(1) वैशाखे (2) आषाढे
(3) भाद्रपदे (4) फाल्गुने
(5) अनुत्तरित: प्रश्न:

84. "सदूषणापि निर्दोषा सखरापि सुकोमला ।" वाक्यांशेन त्रिविक्रमभट्ट: कस्या: स्तुतिं करोति ?
(1) श्रीमद्भगवद्गीताया:
(2) वेदवाण्या:
(3) रामायणीकथाया:
(4) पौराणिकीकथाया:
(5) अनुत्तरित: प्रश्न:

85. मृच्छकटिके दर्दुरकवचनानुसारं केनैव सर्वं नष्टम् ?
(1) व्यसनेनैव (2) पापेनैव
(3) द्यूतेनैव (4) दुराचारेणैव
(5) अनुत्तरित: प्रश्न:

86. "दुर्गस्तरीतुमारब्धो बाहुभ्यामम्भसां पति:" इति कस्य कवेरुक्ति: ?
(1) कालिदासस्य (2) त्रिविक्रमभट्टस्य
(3) श्रीहर्षस्य (4) माघस्य
(5) अनुत्तरित: प्रश्न:

87. 'दग्धैककामं त्रिदिवं विहाय यस्मिन्कुमारोऽपि रतिं चकार ।' इत्यत्र 'कुमार:' क: ?
(1) चन्द्रगुप्त: (2) कार्तिकेय:
(3) गणेश: (4) नल:
(5) अनुत्तरित: प्रश्न:

88. कुण्डिनं पुरम् कस्या: नद्यास्तटे वर्तते ?
(1) गोदावर्या: (2) कृष्णाया:
(3) तुङ्गभद्राया: (4) वरदाया:
(5) अनुत्तरित: प्रश्न:

89. "पुरी पुरुषोत्तमनिवासयोग्याऽस्ति" एतेन वाक्येन का नगरी सङ्कीर्तिता अस्ति ?
(1) अयोध्या (2) निषधा
(3) पद्मावती (4) अवन्ती
(5) अनुत्तरित: प्रश्न:

90. नलचम्पू काव्यस्य उपजीव्यं किम् ?
(1) महाभारतम् (2) रामायणम्
(3) भागवतपुराणम् (4) कविकल्पितम्
(5) अनुत्तरित: प्रश्न:

91. अप्रगल्भा: पदन्यासे जननीरागहेतव: ।
सन्त्येके बहुलालापा: .............. ।
श्लोकेऽस्मिन् के बालका इव वर्णिता: ?
(1) देवा: (2) कवय:
(3) राजान: (4) पौरा:
(5) अनुत्तरित: प्रश्न:

92. चम्पूरामायणस्य बालकाण्डं केन विरचितम् ?
(1) श्री रामचन्द्रबुधेन्द्रेण
(2) श्री लक्ष्मणसूरिणा
(3) श्री भोजराजेन
(4) श्री काशीनाथपाण्डुरङ्गेन
(5) अनुत्तरित: प्रश्न:

93. महाराजदशरथ: वसिष्ठादिष्टमश्वमेधाध्वरः कुत्र पुत्रीयामिष्टिं विधिवत्कर्तुमारभत ?
(1) तमसारोधसि (2) सरयूरोधसि
(3) यमुनारोधसि (4) गङ्गारोधसि
(5) अनुत्तरित: प्रश्न:

94. भोजराजेन 'नाभीपुटाय पुरुषाय नम: परस्मै' इति वाक्येन कस्य स्तुति: कृता ?
(1) नारायणस्य (2) शिवस्य
(3) ब्रह्मण: (4) रामस्य
(5) अनुत्तरित: प्रश्न:

95. 'एनां पुराणनगरीं नगरीतिसालाम्' अत्र 'एनां' पदेन का नगरी सङ्केतिताऽस्ति ?
(1) अयोध्या (2) लङ्का
(3) मिथिला (4) द्वारावती
(5) अनुत्तरित: प्रश्न:

96. "विद्ययेव त्रयीदृष्ट्वा दर्भपत्राग्रधी: सुधी: ।
राजपुत्र्या तया राम: प्रपेदे प्रीतिमुत्तमाम् ।।"
श्लोकेऽस्मिन् कोऽलङ्कार: ?
(1) उपमालङ्कार:
(2) अनन्वयालङ्कार:
(3) विशेषोक्तिरलङ्कार:
(4) व्याजस्तुतिरलङ्कार:
(5) अनुत्तरित: प्रश्न:

97. 'भाग्यैर्योग्यसमागमेन युवयोर्मानुष्यमाणिक्ययो:' अस्मिन्नंशे 'युवयो:' पदेन कयो: वर्णनं कृतम् ?
(1) सीतारामयो:
(2) पार्वतीशिवयो:
(3) शकुन्तलादुष्यन्तयो:
(4) दमयन्तीनलयो:
(5) अनुत्तरित: प्रश्न:

98. नूनं जनेन पुरुषे महति प्रयुक्त–माग: ।
परं तदनुरूपफलं प्रसूते ।।
श्लोकेऽस्मिन् 'आग:' इत्यस्य पदस्य कोऽर्थ: ?
(1) अग्नि: (2) अपराध:
(3) मार्ग: (4) गति:
(5) अनुत्तरित: प्रश्न:

99. अस्मिन्पुरा पुरभिद: परमेश्वरस्य
फालान्तरालनयनज्वलने मनोभू: ।
अस्मिन्नंशे 'मनोभू:' कस्य वाचक: ?
(1) कामदेवस्य (2) शिवस्य
(3) नारायणस्य (4) रामस्य
(5) अनुत्तरित: प्रश्न:

100. अश्वघोषस्य काव्यद्वये को रस: प्रधानो दृश्यते ?
(1) करुणरस: (2) रौद्ररस:
(3) वीररस: (4) शान्तरस:
(5) अनुत्तरित: प्रश्न:

101. "स्वप्नवासवदत्तस्य दाहकोऽभून्न पावक:" ।
भासस्य नाट्यकलालोके कथनमिदं कस्यास्ति ?
(1) राजशेखरस्य (2) राजसिंहस्य
(3) डॉ. पुसालकरस्य (4) अभिनवगुप्तस्य
(5) अनुत्तरित: प्रश्न:

102. "सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपाल: ।।"
श्लोकोऽयं रघुवंशस्य कस्मात् सर्गाद् उद्धृतोऽस्ति ?
(1) चतुर्थसर्गात् (2) पञ्चमसर्गात्
(3) षष्ठसर्गात् (4) सप्तमसर्गात्
(5) अनुत्तरित: प्रश्न:

103. को यक्ष: द्रुहिणप्रसादात् ताटकाख्यां सुतां लेभे ?
(1) सुन्द: (2) सुदेव:
(3) सुकेतु: (4) सुबल:
(5) अनुत्तरित: प्रश्न:

A01413

104. 'पुण्डरीकाक्ष इति स्फुटोऽभवत्' 'पुण्डरीकाक्षः' इत्यनेन पदेन माघकाव्ये कः ज्ञायते:

(1) नारदः (2) श्रीकृष्णः
(3) शिशुपालः (4) हिरण्याक्षः
(5) अनुत्तरितः प्रश्नः

105. "ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वरात्" इयमुक्तिः केन कविना सम्बद्धा

(1) कालिदासेन (2) अश्वघोषेण
(3) श्रीहर्षेण (4) भासेन
(5) अनुत्तरितः प्रश्नः

106. 'चतुर्विंशतिसाहस्रीसंहिता' इति नाम्ना कः ग्रन्थः प्रथितः

(1) महाभारतम् (2) रघुवंशम्
(3) रामायणम् (4) शिशुपालवधम्
(5) अनुत्तरितः प्रश्नः

107. अधोलिखितासु भारवेः सूक्तिरस्ति –

(1) वसन्ति हि प्रेम्णि गुणा न वस्तुनि ।
(2) समय एव करोति बलाबलम् ।
(3) सदाभिमानैकधना हि मानिनः ।
(4) क्षतसकलविपक्षस्तेजसः स स्वभावः ।
(5) अनुत्तरितः प्रश्नः

108. रामायणस्य काण्डानां तत्रत्यैः सर्गैः सह सुमेलनं कुरुत –

(क) बालकाण्डम् (i) 67 सर्गाः
(ख) अयोध्याकाण्डम् (ii) 77 सर्गाः
(ग) किष्किन्धाकाण्डम् (iii) 128 सर्गाः
(घ) युद्धकाण्डम् (iv) 119 सर्गाः

| | (क) | (ख) | (ग) | (घ) |
|---|---|---|---|---|
| (1) | (i) | (ii) | (iii) | (iv) |
| (2) | (ii) | (iv) | (i) | (iii) |
| (3) | (ii) | (iii) | (ii) | (iv) |
| (4) | (i) | (iv) | (ii) | (iii) |

(5) अनुत्तरितः प्रश्नः

109. बाणस्य कादम्बर्यां शूद्रकः स्वप्रथमे द्वितीये च पूर्व जन्मनि क्रमशः आसीत् –

(1) चन्द्रमा, चन्द्रापीडः
(2) शुकः, चन्द्रापीडः
(3) पुण्डरीकः, वैशम्पायनः
(4) चन्द्रापीडः, वैशम्पायनः
(5) अनुत्तरितः प्रश्नः

110. 'कथाकुसुमम्' इत्यस्य कथासंग्रहस्य रचयिता वर्तते

(1) अभिराजराजेन्द्रमिश्रः
(2) अर्कनाथ चौधरी
(3) पं. अम्बिकादत्तव्यासः
(4) देवर्षिकलानाथशास्त्री
(5) अनुत्तरितः प्रश्नः

111. "विश्वमानवीयम्" इति महाकाव्यस्य लेखकोऽस्ति –

(1) पं. विद्याधरशास्त्री
(2) भट्टमथुरानाथशास्त्री
(3) पं. रामप्रतापशास्त्री
(4) पं. जगदीशचन्द्राचार्यः
(5) अनुत्तरितः प्रश्नः

112. टीकायाः काव्यस्य च यथोचितं मेलनं कुरुत –

(क) सर्वङ्कषा (i) किरातार्जुनीयम्
(ख) सञ्जीवनी (ii) नैषधीयचरितम्
(ग) घण्टापथम् (iii) शिशुपालवधम्
(घ) जीवातु (iv) रघुवंशम्

| | (क) | (ख) | (ग) | (घ) |
|---|---|---|---|---|
| (1) | (iii) | (i) | (ii) | (iv) |
| (2) | (ii) | (i) | (iii) | (iv) |
| (3) | (i) | (iv) | (ii) | (iii) |
| (4) | (iii) | (iv) | (i) | (ii) |

(5) अनुत्तरितः प्रश्नः

113. 'महारथी' इत्यस्य महाकाव्यस्य रचनाकारः कः ?

(1) पं. गणेशरामशर्मा

(2) पं. गुलाबचन्द्र चुलेटः

(3) पं. अम्बिकादत्तव्यासः

(4) पं. विद्याधरशास्त्री

(5) अनुत्तरितः प्रश्नः

114. "राष्ट्रवेदः" इतिवैदिककाव्यस्य रचयिता विद्यते –

(1) भट्टमथुरानाथशास्त्री

(2) पं. अम्बिकादत्तव्यासः

(3) आचार्यराधावल्लभत्रिपाठी

(4) आचार्यनवलकिशोरकाङ्करः

(5) अनुत्तरितः प्रश्नः

115. 'मञ्जुनाथ वाग्वैजयन्ती' केन सम्पादिता ?

(1) कलानाथशास्त्रिणा

(2) भट्टमथुरानाथ शास्त्रिणा

(3) पद्मशास्त्रिणा

(4) प्रभाकर शास्त्रिणा

(5) अनुत्तरितः प्रश्नः

116. 'श्रीलक्ष्मणाभ्युदयम्' इति खण्डकाव्यस्य रचयिता वर्तते –

(1) पं. गिरिधरशर्मा

(2) डॉ. ब्रह्मानन्दशर्मा

(3) पं. गणेशरामशर्मा

(4) पं. गिरिधरशर्मा चतुर्वेदी

(5) अनुत्तरितः प्रश्नः

117. अधोलिखितासु रचनासु पं. पद्मशास्त्रिणः रचना नास्ति –

(1) चायशतकम् (2) विश्वकथाशतकम्

(3) सिनेमाशतकम् (4) गणेशशतकम्

(5) अनुत्तरितः प्रश्नः

401413

118. "लहरीदशकं" इत्यस्य लेखकः कः ?

(1) नारायण शास्त्री "कांकर"

(2) अम्बिकादत्त व्यास

(3) राधावल्लभ त्रिपाठी

(4) भट्टमथुरानाथ शास्त्री

(5) अनुत्तरितः प्रश्नः

119. अर्वाचीनकवीनां तेषां रचनानां च यथोचितमेलनं कुरु –

| | |
|---|---|
| (क) पं. गणेशरामशर्मा | (i) यात्राविलासम् |
| (ख) राधावल्लभ त्रिपाठी | (ii) लेनिनामृतम् |
| (ग) पं. नवलकिशोर कांकरः | (iii) संधानम् |
| (घ) पद्मशास्त्री | (iv) संस्कृतकथाकुञ्जम् |

कूट :

| | (क) | (ख) | (ग) | (घ) |
|---|---|---|---|---|
| (1) | (iv) | (iii) | (i) | (ii) |
| (2) | (iv) | (i) | (iii) | (ii) |
| (3) | (iii) | (iv) | (ii) | (i) |
| (4) | (iii) | (iv) | (i) | (ii) |

(5) अनुत्तरितः प्रश्नः

120. गद्यसम्राट् उपाधि समलङ्कृतः कविरस्ति –

(1) गिरिधरशर्मा चतुर्वेदी

(2) पद्म शास्त्री

(3) पं. नवलकिशोर काङ्करः

(4) कलानाथ शास्त्री

(5) अनुत्तरितः प्रश्नः

121. "अवेहि मां किङ्करमष्टमूर्तेः" इति कथनं कस्य ?

(1) दिलीपस्य (2) कुम्भोदरस्य

(3) निकुम्भस्य (4) शम्भोः

(5) अनुत्तरितः प्रश्नः

122. महीक्षितामाद्यः कः आसीत् ?

(1) शतरूपा (2) रघुः

(3) भरतः (4) वैवस्वतः मनुः

(5) अनुत्तरितः प्रश्नः

123. "आपीनभारोद्वहनप्रयत्नात् गृष्टिर्गुरुत्वाद्वपुषो नरेन्द्रः"

अत्र गृष्टिः इति पदस्य कोऽर्थः विवक्षितः ?

(1) पीनस्तना गौः (2) असकृत्प्रसूता गौः

(3) सकृत्प्रसूता गौः (4) स्थूलागौः

(5) अनुत्तरितः प्रश्नः

124. "विचारमूढः प्रतिभासि मे त्वम्"

इत्युक्तौ कः केन सम्बोध्यते ?

(1) दिलीपः सुदक्षिणया

(2) दिलीपः वसिष्ठेन

(3) दिलीपः निकुम्भेन

(4) दिलीपः कुम्भोदरेण सिंहेन

(5) अनुत्तरितः प्रश्नः

125. 'तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।'

अत्र 'तद्' इति पदेन बोध्यः अस्ति –

(1) दिलीपः (2) मनुः

(3) छन्दः (4) प्रणवः

(5) अनुत्तरितः प्रश्नः

126. रघुवंशे रामस्य दुर्जातबन्धुः कः कथितः ?

(1) विभीषणः (2) हनुमान्

(3) सुग्रीवः (4) निषादराजः

(5) अनुत्तरितः प्रश्नः

127. 'लब्ध्वाऽपि लोके परिणाहि रूपम्'

अत्र 'परिणाहि' इति पदस्य कोऽर्थः ?

(1) गौरम् (2) अवद्यम्

(3) वैपुल्ययुक्तम् (4) अमानुषम्

(5) अनुत्तरितः प्रश्नः

128. अभ्यर्थनाभङ्गभयेन कः इष्टेऽप्यर्थे माध्यस्थ्यमवलम्बते ?

(1) असाधुः (2) साधुः

(3) नृपः (4) रिपुः

(5) अनुत्तरितः प्रश्नः

129. 'पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ।'

इति वाक्यम् उवाच –

(1) पार्वती (2) हिमाद्रिः

(3) मेना (4) नारदः

(5) अनुत्तरितः प्रश्नः

130. 'अबिन्धनं वह्निमसौ बिभर्ति

प्रह्लादनं ज्योतिरजन्यनेन ।'

अत्र 'अबिन्धनम्' पदेन यद् विशिष्यते तत् पदम् अस्ति –

(1) प्रह्लादनम् (2) ज्योतिः

(3) असौ (4) वह्निम्

(5) अनुत्तरितः प्रश्नः

131. कुमारसम्भवमहाकाव्ये किं नाम पञ्चमसर्गस्य ?

(1) पार्वत्या: तपश्चर्या नाम

(2) तप:फलोदयो नाम

(3) उमाप्रदानो नाम

(4) उमापरिणयो नाम

(5) अनुत्तरित: प्रश्न:

132. 'न रत्नमन्विष्यति मृग्यते हि तत् ।' इति वचनं वदति –

(1) पार्वती वर्णिनं प्रति

(2) वर्णी पार्वतीं प्रति

(3) मेना पार्वतीं प्रति

(4) पार्वत्या: सखी वर्णिनं प्रति

(5) अनुत्तरित: प्रश्न:

133. "गुहोऽपि येषां प्रथमाप्तजन्मनां,

न पुत्रवात्सल्यमपाकरिष्यति ।।"

अत्र 'गुह:' इति पदेन कोऽभिप्रेत: ?

(1) गजानन:

(2) मैनाक:

(3) शिव:

(4) कार्तिकेय:

(5) अनुत्तरित: प्रश्न:

134. 'परमार्थत हरं न वेत्सि' इति कथितम्

(1) पार्वतीं प्रति ब्रह्मचारिणा

(2) पार्वत्या ब्रह्मचारिणं प्रति

(3) हिमालयेन मेनां प्रति

(4) मेनया हिमालयं प्रति

(5) अनुत्तरित: प्रश्न:

401413 401413 401413

135. "वनान्तशय्याकठिनीकृताकृतीकचाचितौ विष्वगिवागजौ गजौ ।"

अत्र कयो: वर्णनमस्ति ?

(1) भीमनकुलयो: (2) सहदेवार्जुनयो:

(3) भीमार्जुनयो: (4) नकुलसहदेवयो:

(5) अनुत्तरित: प्रश्न:

136. कीदृशा: मूढधिय: पराभवं व्रजन्ति ?

(1) भवन्ति मायाविषु येऽपि मायिन:

(2) भवन्ति मायाविषु ये तथाविधा:

(3) भवन्ति मायाविषु ये न मायिन:

(4) भवन्ति मायाविषु ये शठोत्तमा:

(5) अनुत्तरित: प्रश्न:

137. 'स तु तत्र विशेषदुर्लभ: सदुपन्यस्यति कृत्यवर्त्म य: ।' इति वचनमस्ति

(1) युधिष्ठिरं प्रति भीमस्य

(2) युधिष्ठिरं प्रति द्रौपद्या:

(3) भीमं प्रति युधिष्ठिरस्य

(4) द्रौपदीं प्रति युधिष्ठिरस्य

(5) अनुत्तरित: प्रश्न:

138. उन्नतं पदमारोढुमिच्छत: आलम्बनं किम् ?

(1) धर्मम् (2) धनम्

(3) सदाचरणम् (4) आत्मपौरुषम्

(5) अनुत्तरित: प्रश्न:

139. 'न बाधतेऽस्य त्रिगण: परस्परम् ।'

वनेचरस्य अस्मिन् वचसि 'त्रिगण:' इति पदेन के उच्यन्ते ?

(1) सत्त्वरजस्तमांसि

(2) कामक्रोधलोभा:

(3) माधुर्यमोज:प्रसादा:

(4) धर्मार्थकामा:

(5) अनुत्तरित: प्रश्न:

140. 'रराज कीर्णाकपिशांशुजालः शृंगात्सुमेरोरिव तिग्मरश्मिः ।।'

अत्र 'रराज' इति क्रियायाः कर्ता कः ?

(1) मुनिर्व्यासः (2) तिग्मरुचिः

(3) अंशुजालः (4) युधिष्ठिरः

(5) अनुत्तरितः प्रश्नः

141. "न यावदेतावुदपश्यदुत्थितौ जनस्तुषाराञ्जन-पर्वताविव ।"

अत्र तुषाराञ्जनपर्वताविव कौ ?

(1) नारदकृष्णौ (2) कृष्णरामौ

(3) हिमनीलाचलौ (4) नारदबलभद्रौ

(5) अनुत्तरितः प्रश्नः

142. माघकाव्ये उदीर्णरागः कुत्र प्रतिरोधकः वर्णितः ?

(1) धर्ममार्गे (2) काममार्गे

(3) अर्थमार्गे (4) मोक्षमार्गे

(5) अनुत्तरितः प्रश्नः

143. 'तदेनमुल्लङ्घितशासनं विधेर्विधेहि कीनाश-निकेतनातिथिम्'

अत्र कीनाशशब्दस्य अर्थः अस्ति –

(1) शिवः (2) इन्द्रः

(3) यमः (4) विष्णुः

(5) अनुत्तरितः प्रश्नः

144. विपक्षमखिलीकृत्य का दुर्लभा ?

(1) सम्पदा (2) प्रतिष्ठा

(3) अनादरः (4) लघुता

(5) अनुत्तरितः प्रश्नः

145. कीदृशं नृपतिं मूढता नियमेन न वियुङ्क्ते ?

(1) नीतिविमुखम् (2) अविवेकिनम्

(3) अदूरदर्शिनम् (4) मदमानसमुद्धतम्

(5) अनुत्तरितः प्रश्नः

146. 'पञ्चतपसस्तपनो जातवेदसाम्' – अत्र 'तपनः' इति पदस्य कोऽर्थः ?

(1) अग्निः (2) चन्द्रः

(3) तपस्वी (4) सूर्यः

(5) अनुत्तरितः प्रश्नः

147. मा जीवन् यः परावज्ञादुःखदग्धोऽपि जीवति ।

तस्याजनिरेवास्तु जननीक्लेशकारिणः ।।

कस्योक्तिरियम् ?

(1) उद्धवस्य (2) वेदव्यासस्य

(3) श्रीकृष्णस्य (4) बलरामस्य

(5) अनुत्तरितः प्रश्नः

148. 'पदैश्चतुर्भिः सुकृते स्थिरीकृते कृतेऽमुना के न तपः प्रपेदिरे ?'

अस्मिन् वाक्ये 'कृतेऽमुना' इत्यत्र 'कृते' इति पदस्य विवक्षितार्थः अस्ति –

(1) सत्ययुगे (2) धर्मे

(3) सम्पादिते (4) षष्ठ्यर्थे

(5) अनुत्तरितः प्रश्नः

149. नलस्य रसनाग्रनर्तकीविद्या केन विस्तरं नीता ?

(1) प्रतिभावैशिष्ट्येन (2) मेधया

(3) वेदाभ्यासेन (4) अङ्गगुणेन

(5) अनुत्तरितः प्रश्नः

150. सर्वाङ्गैः संवृतैरपि परेभ्यो भेदशङ्कया चिरं स्थातुं कः न सहते ?

(1) रिपुः (2) कृत्रिममित्रम्

(3) कान्तानुरागः (4) मन्त्रः

(5) अनुत्तरितः प्रश्नः

रफ कार्य के लिए स्थान / SPACE FOR ROUGH WORK

401413

401413

401413